ओ३म्

गुरुकुल-पत्रिका

[गुरुकुल कांगड़ी विश्वविद्यालयस्य मासिक पत्रिका]

वैशाख २०२५, अप्रैल-मई १९६८, वर्षम् २०, अङ्कः ९, पूर्णाङ्कः २३७

श्रुति-सुधा

(ऋषि –मेधातिथि काण्व । देवता–ऋभव । छन्द – गायत्री)

स वो मदासो अग्मतेन्द्रेण च मरुत्वता ।
आदित्येभिश्च राजभिः ।। ऋ० १।२०।५

हे ऋभुओ ! (वः) तुम्हारे (मदासः) विद्याविलास (इन्द्रेण मरुत्वता) मरुत् अर्थात् दिव्यप्राण वाले इन्द्र के साथ (आदित्येभिः च राजभिः) देदीप्यमान आदित्यों के साथ (सम्‌अग्मत) संगत होवे ।

ऋत से देदीप्यमान प्रज्ञा रश्मियों का विद्याविलास दिव्य प्राणों से युक्त और इन्द्र (दिव्य मन) के साथ होना चाहिये या मस्तिष्क में विद्यमान आदित्यों अर्थात् बौद्धिक केन्द्रों के साथ । बहिर्मुखीवृत्ति व बाह्य भौतिक जगत् में विचरण इन के अध:पतन का कारण बनता है ।

भवभूतिकालिदासयोः करुणो रसः

(श्री विनोदचन्द्रो विद्यालंकारः एम ए., गुरुकुल कांगड़ी)

काव्यं खलु शृङ्गारहास्यकरुणरौद्रवीरभयानकबीभत्साद्भुतशान्ता नवरसाः । सर्वे कवय आत्ममत्यनुसारमेतेषां रसानां प्रयोग कुर्वन्ति । केचित् शृङ्गाररसम्, अपरे वीररसम्, इतरे च शान्तरस मुख्यतयाङ्गीकुर्वन्ति । प्रायशः सर्वेषां कवीनां काव्येषु करुणरसस्य प्रयोग. प्रचुररूपेणाल्परूपेण वाऽवश्यमेव विद्यते । विप्रलम्भशृङ्गाररसोऽपि करुणरसस्याङ्गमस्ति । करुणरसेऽभिनयस्य दर्शनेन यदश्रुपातादिक भवति, तत्तु चित्तस्य द्रवत्वादेव जायते ।

विप्रलम्भशृङ्गारे नायकनायिकयोर्गाढानुरागो भवति, परं तयोः पारस्परिकसम्मेलनं न जायते— 'यत्र तु रतिः प्रकृष्टा नाभीष्टमुपैति विप्रलम्भोऽसौ ।'

साहित्यदर्पण ३.१८७

करुणविप्रलम्भशृङ्गारयोरन्तरमिदमस्ति, यदुभयोः स्थायिभावौ भिन्नौ स्तः । करुणरसस्य स्थायिभावः शोको, विप्रलम्भस्य च रतिः । विप्रलम्भे पुनः सम्मेलनस्य आशा भवति—

"शोकस्थायितया भिन्नो विप्रलम्भादयं रसः ।
विप्रलम्भे रतिः स्थायी पुन. सम्भोगहेतुक. ।।"

सा० द० ३.२२६

परं विश्वविदितमहानुभूतिना अद्वितीयेन नाटककारेण भवभूतिना 'उत्तररामचरिते' विप्रलम्भशृङ्गाररसस्यान्तर्भावं करुणरसे कृत्वा, करुणरस एव मुख्यरूपेण प्रतिपादित. । यतोह्यस्य रसस्य विषये कवेर्दृष्टिकोणमतिविस्तृतमस्ति । स तु प्रधानरूपेणास्यैव कविवर्तते । तस्य मते शृङ्गारादयोऽन्ये सर्वे रसाः करुणरसस्यैव विपरिणामाः । तेन स्पष्टमेवोक्तम्—

"एको रसः करुण एव निमित्तभेदाद्-
भिन्नः पृथक्पृथगिव श्रयते विवर्तान् ।
आवर्तबुद्बुदतरङ्गमयान्विकारा-
नम्भो यथा सलिलमेव हि तत्समस्तम् ।"

उत्तर० ३.४७

श्लोकोऽयमुत्तररामचरितस्य मूलमेव । कवेः करुणरसे एतादृशः प्रभावो यद् जडा अपि चेतनतां प्राप्तुं शक्नुवन्ति । उक्तमपि—

"अपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम् ।"

नाटकस्य प्रथमाङ्के चित्रदर्शने हासपरिहासादीनां दृश्य करुणायाः पृष्ठभूमौ गाम्भीर्यमुत्पादयति । चित्रदर्शनकाले पञ्चवट्या दृश्यमवलोक्य रामः सीता चात्मनो वियोगं स्मृत्वा व्याकुलौ भवत. । रामो लक्ष्मण व्याहरति—

"तत्काल प्रियजनविप्रयोगजन्मा
तीव्रोऽपि प्रतिकृतिवाञ्छया विसोढः ।
दुःखाग्निर्मनसि पुनर्विपच्यमानो
हृन्मर्मव्रण इव वेदनां तनोति ।।"

उत्तर० १.३०

रामः सीताविषये जनापवादमाकर्ण्यैव मूर्च्छितो भवति, चेतनावस्थायामपि तस्य सा मूर्च्छा विद्यमाना वर्तते । स विलपन् कथयति—

"दुःखसंवेदनायैव रामे चैतन्यमागतम् ।
मर्मोपघातिभिः प्राणैर्वज्रकीलायितं हृदि ।।"

उत्तर० १.४७

एतादृशो विलापः कस्य हृदये करुणासंचारं न विधास्यति ।

द्वितीयाङ्के शम्बूकवधाय दण्डकारण्यं प्रविष्टस्य रामस्य हृदयं तत्रस्था लता वृक्षा गोदावर्या जलकणाश्च प्रहरन्ति । तान् विलोक्य विकलो रामः इत्थं प्रलपति—

"चिराद्वेगारम्भी प्रसृत इव तीव्रो विषरसः,
कुतश्चित्संवेगात्प्रचल इव शल्यस्य शकलः ।
व्रणो रूढग्रन्थिः स्फुटित इव हृन्मर्मणि पुनः
पुराभूतः शोको विकलयति मां नूतन इव ॥

उत्तर० २.२६

तृतीयाङ्के करुणरसः प्रचुरमात्राया दृष्टिगोचरो भवति। वासन्त्या सह दण्डकारण्ये विविधानि दृश्यानि रामस्य चित्ते वेदनामुत्पादयन्ति। करुणरसस्य यादृशं तीव्रं, गम्भीर, मार्मिकं चित्रणमस्मिन्नङ्के वर्तते तादृशमन्यत्र दुर्लभम्। एतदेवास्य गाम्भीर्यम्--

अनिर्भिन्नो गभीरत्वादन्तर्गूढघनव्यथः ।
पुटपाकप्रतीकाशो रामस्य करुणो रसः ॥"

उत्तर० ३.१

राम. सीतां स्मृत्वा मूर्च्छति, हृदयद्रावकेषु शब्देषु चेत्थं विलपति--

"हा हा देवि! स्फुटति हृदयं ध्वंसते देहबन्धः
शून्यं मन्ये जगदविरलज्वालमन्तर्ज्वलामि ।
सीदन्नन्धे तमसि विधुरो मज्जतीवान्तरात्मा
विष्वङ्मोहः स्थगयति कथं मन्दभाग्यः करोमि ॥"

उत्तर. ३.३८

पतिनिर्वासितायाः सीताया अधो वर्णनं कस्य हृदये करुणां नोत्पादयिष्यति--

"परिपाण्डुदुर्बलकपोलसुन्दरं,
दधती विलोलकबरीकमाननम् ।
करुणस्य मूर्तिरथवा शरीरिणी,
विरहव्यथेव वनमेति जानकी ॥ उत्तर. ३.४

पञ्चमाङ्के चन्द्रकेतुः सुमन्त्रश्च लवमालोक्य रघुकुलस्य कस्यचिद् वंशजस्य कल्पनां कुरुतः। परं सीतां स्मृत्वा कष्टमनुभवतः। सुमन्त्रो विलपन् कथयति--

मनोरथस्य यद्बीजं तद्दैवेनादितो हृतम् ।
लतायां पूर्वलूनायां प्रसवस्योद्भवः कुतः ?

अप्रतिष्ठे कुलज्येष्ठे का प्रतिष्ठा कुलस्य नः
इति दुःखेन तप्यन्ते त्रयो नः पितरोऽपरे ॥

उत्तर० ५.२०

षष्ठाङ्के कशलवावलोक्य रामस्य हृदयं वात्सल्याप्लुतं जायते। तयोः सीताया रूपमवलोक्य स पुनस्तां स्मरति। भवभूतिना वृत्तं रामस्य वेदनायाश्चित्रणं पाठकानां मनोऽपि वेदनापूर्णमाकलयति--

चिरं ध्यात्वा ध्यात्वा निहित इव निर्माय पुरतः
प्रवासे चाश्वासं न खलु न करोति प्रियजनः ।
जगज्जीर्णारण्यं भवति च कलत्रे ह्युपरते
कुकूलानां राशौ तदनु हृदयं पच्यत इव ॥

उत्तर० ६.३८

सप्तमाङ्के रामसीतयोः पुनर्मिलनं भवति। परमस्य सम्मेलनस्य मूलेऽपि सीतानिर्वासनस्य करुणोऽभिनयो वर्तते। तमभिनयमवलोक्य राम. 'क्षुभितवाष्पोत्पीडनिर्भरो' भूत्वानेकवारं मूर्च्छति। अङ्केऽस्मिन्नपूर्वं भावगाम्भीर्यं विद्यते। करुणरसस्य च सुखकरी मधुरा च परिणतिरस्ति।

उत्तररामचरिते न केवलं रामस्य करुणश्चित्रितः किन्तु जनकस्य, कौसल्यायाः, मन्त्रिप्रवरस्य सुमन्तस्य चापि शोकस्य चर्चोपलभ्यते।

राज्ञो जनकस्य वेदना करुणवात्सल्ये प्रकटीभवति। स सीतायाः शैशवस्य स्मरन् विलपति--

"अनियतरुदितस्मितं विराजत्,
कतिपयकोमलदन्तकुड्मलाग्रम् ।
वदनकमलकं शिशोः स्मरामि,
स्खलदसमञ्जसमजल्पितं ते ॥"

उत्तर० ५.४

अपि च,

"नूनं त्वया परिभवं च वनं च घोरं
तां च व्यथां प्रसवकालकृतामवाप्य ।

क्रव्याद्गणेषु परित. परिवारयत्सु
संत्रस्तया शरणमित्यसकृत्स्मृतोऽहम् ॥"

उत्तर० ४.२३

जनको लवमवलोक्य सीताया अङ्गलावण्य स्मृत्वा च दुःखितो भवति—

"वत्सायाश्च रघूद्वहस्य च शिशावस्मिन्नभिव्यज्यते,
संवृत्तिःप्रतिबिम्बितेव निखिला सैवाकृतिः सा द्युति ।
सा वाणी विनयः स एव सहजः पुण्यानुभावोऽप्यसौ
हा हा देवि किमुत्पथैर्मम मनः पारिप्लवं धावति ॥'

उत्तर० ४.२२

करुणरसस्यैतादृशीं तीव्रतां, मार्मिकतां च दृष्ट्वैव गोवर्धनाचार्येणोक्तम्—

"भवभूतेः सम्बन्धाद् भूधरभूरेव भारती भाति ।
एतत्कृतकारुण्ये किमन्यथा रोदिति ग्रावा ।"

केनापि सत्यमाजोविनम्—

"कारुण्यं भवभूतिरेव तनुते ।"

भवभूतेरतिरिक्तं महाकवेः कालिदासस्य काव्येष्वपि करुणरसस्य सरित् प्रवहति ।

अभिज्ञानशाकुन्तलनाटकस्य चतुर्थोऽङ्कः करुणरसपूर्णः । एतादृशं कारुण्यपूर्णवर्णनमन्यत्र दृष्टिपथं नायाति । लतानां भगिनी, मृगशिशूनां रक्षिका, तपोवनस्य पशुपक्षिणां सखी शकुन्तला यदा पतिगृहमेति, तदा सर्वस्मिन्नेवाश्रमे कारुण्यधारा प्रस्यन्दति । तपस्विनां मनोऽपि वेदनापूर्णं जायते । मुनेः काश्यपस्य चिरसंचितं वात्सल्यमपि धैर्यबन्धं त्रोटयित्वा नदीप्रवाहवत् निर्गच्छति । स च शकुन्तलायाः गमनकल्पनयैव व्याकुलो भवति—

"यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
कण्ठः स्तम्भितवाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम् ।
वैक्लव्यं मम तावदीदृशमिदं स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथं न तनयाविश्लेषदुःखैर्नवैः ॥

उत्तर० ४.७

यदा शकुन्तला पतिगृहं गन्तुमुद्यता भवति तदा काश्यप आश्रमवृक्षान् सम्बुद्धय व्याहरति—

"भो भोः सन्निहितवनदेवतास्तपोवनतरव.—
पातुं न प्रथमं व्यवस्यति जलं युस्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम् ।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सव.
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ।"

४.६

श्लोकोऽयं कस्यसहृदयस्य चित्ते कारुण्यसंचारं न करिष्यति ? कालेऽस्मिन् तपोवनस्य जन्तूनां, पक्षिणा, वनस्पतीनाञ्च दशाप्यतिशयशोचनीया वर्तते । मृग मार्गावरोधन करोति, प्रकृतिश्च पत्राणां पतनव्याजेनाश्रूणि मुञ्चति । प्रकृतेरेतादृशं महानुभूतिपूर्णं वर्णनमन्यत्र नास्ति ।

"उदगलितदर्भकवला मृग्यः परित्यक्तनर्तना मयूरी ।
अपसृतपाण्डुपत्रा मुञ्चन्त्यश्रूणीव लताः ॥" ४.१२

यदा शकुन्तला आत्मनो लताभगिन्या वनज्योत्स्नायाः समीपमागच्छति, तदा सा तामवलोक्य शोकाकुलचित्तेन स्वसख्यौ प्रियम्वदानसूये निवेदयति—"हला, एषा द्वयोर्युवयोर्हस्ते निक्षेप ।" एतद्वचनमाकर्ण्य रुदत्यौ ते कथयत — 'अयं जनः कस्य हस्ते समर्पित ?" एतत्सर्वं वर्णनं करुणमस्ति ।

गमनतत्परा शकुन्तला पितरमाश्लिष्य वदति—"कथमिदानीं तातस्याङ्कात् परिभ्रष्टा मलयतटोन्मूलिता चन्दनलतेव देशान्तरे जीवितं धारयिष्यामि ।" एतदाकर्ण्य काश्यपोऽपि शोकपरिप्लुतो भवति, वदति च—

"वत्से कथं मामेवं जडीकरोषि—
अपयास्यति मे शोकः कथं नु वत्से त्वया रचितपूर्वम् ।
उटजद्वारविरूढं नीवारबलिं विलोकयतः ॥"

जगत्यस्मिन्नेतादृशं कोमलं स्नेहकरुणं चित्रं कोऽन्यः कविर्वर्णयितुं शक्नोति ।

कविः कुमारसंभवस्य रतिविलापे रघुवंशस्य चाजविलापे विस्तृतवर्णनैः करुणरसस्य निर्झरिणीः प्रवाहयति । कुमारसंभवे पत्युर्भस्मीभूतं शरीरमवलोक्य रतिर्विलपति—

"गत एव न ते निवर्तते स सखा दीप इवानिलाहतः ।
अहमस्य दशेव पश्य मामविषह्यव्यसनेन धूमिताम् ।।
४.३०

चेतनावस्थायां सा आत्मनः पत्युर्मदनस्य गुणान् प्रणयविलासाँश्च स्मृत्वा शोकवशादधीरा जायते । वर्णनमेतद् हृदयविदारकमस्ति ।

"क्व नु मां त्वदधीनजीवितां
विनिकीर्य क्षणभिन्नसौहृदः ।
नलिनीं क्षतसेतुबन्धनः
जलसंघात इवासि विद्रुतः ।।" ४.६

यदा रतिविलापमाकर्ण्य कामस्य सखा मधुरागच्छति तदा सा अत्युच्चस्वरेण कारुण्यपूर्णं रोदिति—

"तमवेक्ष्य रुरोद सा भृशं स्तनसम्बाधमुरो जघान च ।
स्वजनस्य हि दुःखमग्रतो विवृतद्वारमिवोपजायते ।।"
४.२६

रघुवंशे इन्दुमत्या वियोगेनोत्पन्नामजस्यावस्थामवलोक्य कस्य मनो न द्रूयते—

"विललाप स वाष्पगद्गदं सहजामप्यपहाय धीरताम् ।
अभितप्तमयोऽपि मार्दवं भजते कैव कथा शरीरिषु ।"
८ ४३

अज इन्दुमत्या विविधान् गुणान् स्मृत्वा व्याकुलो भवति—

"स्रगियं यदि जीवितापहा,
हृदये किं निहिता न हन्ति माम् ।
विषमप्यमृतं क्वचिद्भवेद्,
अमृतं वा विषमीश्वरेच्छया ।" ८.४६

अपि च,

"गृहिणी सचिवः सखी मिथः,
प्रियशिष्या ललिते कलाविधौ ।
करुणाविमुखेन मृत्युना,
हरता त्वां वद किं न मे हृतम् ।" ८ ६७

अत्र कविना करुणरसस्य स्रोतस्विनी प्रवाहितेति सत्यमेव । सीतापरित्यागे रामस्यावस्थापि दर्शनीया—

"बभूव रामः सहसा सबाष्पः ,
तुषारवर्षीव सहस्य चन्द्रः ।
कौलीनभीतेन गृहान्निरस्ता,
न तेन वैदेहसुता मनस्तः ।" १४.८४

श्लोकोऽयं रामहृदये विद्यमानस्य शोकस्याभिव्यञ्जनां तीव्रां विदधाति । यस्य पुरतो भवभूतेः सहस्राणि करुणोत्पादकानि वर्णनानि समर्पयितुं शक्यन्ते ।

कवेरस्य मेघदूतनाम्नो गीतिकाव्यस्य विप्रलम्भशृङ्गारोऽपि करुणाजनकोऽस्ति । विरहविधुराया यक्षिण्याश्चित्रणं मर्मस्पर्शीत्यहं मन्ये । मेघदर्शने वियोगिनां चेतः कथं विकृतिमाप्नोति ? दृश्यताम्—

"मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः ।
कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे ।।"
पू० मे० ३

चित्रणमेतत् सत्यमनुभूतिपूर्णञ्चास्ति । अत्रातिसरलेषु शब्देषु नैसर्गिकभावानां मार्मिकचित्रणमस्ति । विरहे प्रियतमसमागमाशया यक्षपत्नी कथं विरहावशिष्टदिनसंख्याने आसक्ता वर्तते—

"तां चावश्यं दिवसगणनातत्परामेकपत्नीम्,
अव्यापन्नामविहतगतिर्द्रक्ष्यसि भ्रातृजायाम् ।"

आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानाम्
सद्यः पाति प्रणयि हृदयं विप्रयोगे रुणद्धि"
पू० मे० ६

अत्र प्रतिपादिता तीव्रा विरहवेदना केवलं सहृदयानां ज्ञानस्य विषयो भवितुमर्हति ।

उत्तरमेघे यक्षस्य यक्षपत्न्याश्च विरहावस्थायाः वर्णनमतिशयकरुणोत्पादकमस्ति । कविः कालिदासो विरहिण्या यक्षपत्न्या भावानुभावसञ्चारिभावानामतिसुन्दरं चित्रणं कृतवान् । विरहतापेन पीडिता यक्षिणी रात्रीः कथं यापयति—

"आधिक्षामां विरहशयने सन्निषण्णैकपार्श्वां
प्राचीमूले तनुमिव कलामात्रशेषां हिमांशोः ।
नीताः रात्रिः क्षण इव मया सार्धमिच्छारतैर्या
तामेवोष्णैः विरहमहतीमश्रुभिर्यापयन्तीम् ॥"
उ० मे० २६

यक्ष आत्मनः प्रणयकुपितायाः प्रियायाश्चित्रमेकमालिख्य तस्याश्चरणयोः पतितुमिच्छति, परं दैवं चित्रेऽपि तयोः सम्मेलनं न सहते—

"त्वामालिख्य प्रणयकुपितां धातुरागैः शिलायामात्मानं ते चरणपतितं यावदिच्छामि कर्तुम् ।
अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते संगमं नौ कृतान्तः ।"
उ० मे० ४५

विरहतप्ताया यक्षपत्न्या दयनीयदशामवलोक्य मेघोऽपि विलपिष्यतीति विचारयन् कश्चिद्यक्षिण्याः करुणोत्पादकदशां वर्णयति—

"सा संन्यस्ताभरणमबला पेशलं धारयन्ती
सय्योत्सङ्गे निहितमसकृद् दुःखदुःखेन गात्रम् ।
त्वामप्यस्रं नवजलमयं मोचयिष्यत्यवश्यं
प्रायः सर्वो भवति करुणावृत्तिरार्द्रान्तरात्मा ।"
उ० मे० ३३

मेघदूते यक्षिण्या विरहवेदनायाश्चित्रणेन सह विरहतप्तस्य यक्षस्य चित्रणमपि शोभनमस्ति । 'नगाधिराजस्य हिमालयस्य वायुः प्रियाया अङ्गानि स्पृष्ट्वैवागच्छति' इति विचार्य स तस्य गाढालिङ्गनं विदधाति—

"भित्त्वा सद्यः किसलयपुटान्देवदारुद्रुमाणां
ये तत्क्षीरस्रुतिसुरभयो दक्षिणेन प्रवृत्ताः ।
आलिङ्ग्यन्ते गुणवति मया ते तुषाराद्रिवाताः
पूर्वं स्पृष्टं यदि किल भवेदङ्गमेभिस्तवेति ।"
उ० मे० ४७

विरहदुःखेन व्याकुलो यक्षो निशामप्यतिशयदीर्घां मन्यते । स इच्छति यत् केनापि प्रकारेण रात्रिर्लघु भवेत्—

"संक्षिप्येत क्षण इव कथं दीर्घयामा त्रियामा
सर्वावस्थास्वहरपि कथं मन्दमन्दातपं स्यात् ।
इत्थं चेतश्चटुलनयने दुर्लभप्रार्थनं मे
गाढोष्माभिः कृतमशरणं त्वद्वियोगव्यथाभिः ॥"
उ० मे० ४८

एवं मेघदूते विप्रलम्भशृङ्गारस्य करुणकोमलभावानामतीव शोभना व्यञ्जना वर्तते, यया सहृदयपाठकानां चित्ते कारुण्योत्पादनं भवति ।

इत्थं महाकवेः कालिदासस्य काव्येषु नाटकेषु च करुणरसस्य प्राचुर्यमस्ति ।

अनेन वर्णनेन वयं जानीमो यत् महाकव्योर्भवभूतिकालिदासयोरमरकाव्येषु करुणरसस्य परस्परं भिन्नैव व्यञ्जना जायते । कालिदासस्तु द्वित्रशब्देष्वेव मार्मिकभावनायाः सर्जनं करोति, पर भवभूते कारुण्यपूर्णवर्णनेषु चित्रणेषु च वाग्विस्तार उपलभ्यते । भवभूतेरतिशयभावुकतापूर्णानां भावानां विस्तारेण पाठकाः क्वचित् श्रान्तचित्ता भवन्ति । कालिदासस्य काव्येषु विरहिजना अश्रुपातं विधायैव सकलान् भावान् प्रकटयन्ति, परं भवभूतेर्नाटके वियोगिन उच्चस्वरेण हृदयद्रावकेषु शब्देष्वित्थं विलपन्ति यदन्ते ते मूर्च्छामप्याप्नुवन्ति । तथापि भवभूतेः पुटपाकप्रतीकाशस्य करुणरसस्य विशेषता वर्तत एव ।

(गताङ्कतोऽग्र)

संस्कृतभाषायाः पत्रकारिताक्रमविकाशः

(ले० विद्याभूषणः श्रीगणेशरामशर्मा, डूंगरपुरम्)

एवं तदेतत् सर्वं मनसि सम्प्रधार्यादौ ततो यदि संस्कृतज्ञानामस्माकं ज्ञानविज्ञाननिधेः पुरातन-साहित्यस्य पुनरुज्जीवनं, संरक्षणं, तत्प्रचारादिक-मावश्यकं, यदि च संस्कृतभाषायां नवसाहित्य-सृष्टिर्जायमानाऽपेक्ष्यते, यदि च संस्कृतसमाजस्य नवयुगापेक्षि सुदृढतरं सङ्घटनमभिलष्यते, यदि वयं तामिमां प्राचीनामपि संस्कृतभाषां सप्राणां स्वस्थं जीवन्तीं युगधर्मानुष्ठानायोपयोगिनीं विधातुमिच्छामो, यदि च भारतराष्ट्रेऽधुना सम्पद्यमाने नवनिर्माणे संस्कृतस्य कमपि तात्त्विकं व्यवहारं सदुपयोगं च समर्थयामहे, यदि च वर्तमानविश्वस्य ज्ञानविज्ञानकलादीनां तच्छिल्प-गतानि तत्वानि संस्कृतभाषाया माध्यमेन संस्कृत-समाजस्य सदस्येभ्यो वितरीतुमिच्छामो, यदि चात्र देशे प्रजातन्त्रात्मिकायां शासनपद्धतौ प्रवर्त-मानायां संस्कृतज्ञानां बहुमतापादनपूर्वकमधिकार-संरक्षणं कामयामहे, यदि च संस्कृतविदुषां विज्ञानक्षेत्रे, राजनीत्यां, प्रशासने, राष्ट्रियजीव-नस्य नानाक्षेत्रेषु क्रियात्मकं योगदानं वाञ्छामो, यदि संस्कृतसेविजनानां प्रोत्कर्षमयं जीवनमधि-कार्युक्तं च निर्विघ्नामिच्छामो, यदि च वयं संस्कृतज्ञाः स्वविद्यावैभवेन, ज्ञानप्रकाशेनानुभवेन च विश्वमानवेभ्यो देशबन्धुभ्यश्च संस्कृतवाङ्मय-द्वाराऽऽध्यात्मिकीमाधिदैविकीमाधिभौतिकीं च सेवां समर्पयितुमभिलषामो, यदि संस्कृतगिरां संस्कृत-साहित्यस्य च कमपि दिव्यं सन्देशं विश्वशान्तये श्रावयितुमुद्युञ्ज्महे, यदि महर्षिजनसम्पत्ताया आर्यसंस्कृतेः सनातनवर्णाश्रमधर्मस्य च संरक्षणं, सम्वर्द्धनं, प्रचारं वा वयं स्वकर्तव्यं मन्यामहे, यदि चात्र राष्ट्रेऽस्माकं भारते सदाचारस्य सच्चरित्रस्य त्यागस्य शौर्यस्य, धैर्यधर्मादिगुणानां महिमानमुदात्ततां वा प्रसारयितुं धर्मतो न्यायतो चात्मीयं किमपि कर्तव्यमवश्यकर्तव्यताकं विद्महे, तदावश्यमेवास्माभिर्युगधर्मधाराप्रवाहानुसारं संस्कृत-पत्रकारिताया माध्यमेन स्वनीत्या, सङ्घटनेन, स्वपद्धत्या, स्वस्य दृष्टिकोणेन च सर्वतन्त्रस्वतन्त्रमपि समर्यादं प्रवर्तितव्यमेवेति सर्वथा समयोचितम्। राष्ट्रात्मा सोऽस्मान् कर्मण्यत्र प्रवर्तनार्थमाह्वयति, प्रेरयति, प्रचोदयति, प्रोद्योजयति, प्रोत्साहयति च सर्वतः सर्वभावेन।

अथ स्वीकृतेऽपि संस्कृतपत्रकारिताया विकाश-सिद्धान्तेऽस्यावश्यकेऽधुना सर्वादौ किं कर्तव्यमिति प्रश्नोऽयमतीव स्वाभाविकः। अतोऽत्र संक्षेपतः किमपि प्रस्तूयतेऽधस्तात्—

सर्वादौ सविधिविधानं संस्कृतपत्रकारसङ्घः संस्थापनीयो यस्य कार्यकारिण्यां समितौ वर्तमान-समये ये ये संस्कृतपत्रपत्रिकायाः सम्पादकास्तथा ये ये संस्कृतसंस्थाप्रतिष्ठानसंस्थानादीनां सङ्घटनानां सञ्चालकास्ते ते सर्वे प्राथमिकतया सदस्यत्वे-नान्तर्गृहीतव्याः।

स एष संस्कृतपत्रकारसङ्घः संस्कृतस्य पत्र-कारकलाया विकाशाय चेष्टताम्। चेष्टाया अस्याः प्रतीकरूपं न्यूनातिन्यूनं पत्रद्वयं सम्पाद्यताम्। एकं दैनिकं समाचारपत्रमपरं च साहित्यिकी मासिकपत्रिका चेति। दैनिकसमाचारपत्रद्वारा स्फूर्तिस्फारं संस्कृतसमाजस्य सङ्घटनं तथा संस्कृत-पत्रकारितास्वरूपं सुस्पष्टमाविर्भवितुमर्हति।

मासिकपत्रेण साहित्योन्नतिः संसाध्यताम् । उभयोरप्येतयोः पत्रयोः कर्मक्षेत्रे भिन्ने सति, तच्छिल्परचनायां पृथग्विधायामपि सत्यां, सम्पादनकलादृशा मिथः सात्त्विकी स्पर्धा वाञ्छनीया स्यात् । दैनिकं पत्रं पूर्वमुत्कृष्टतां स्पृशति किं वा मासिकी पत्रिकेति गुणानुरोधात् प्रतियोगितेव प्रवर्तताम् । एवमन्योन्यं स्पर्धया तदिदं पत्रद्वयमपि सक्षमं, प्रौढं, सवरिष्णु च भूयात् ।

वस्तुतो दैनिकपत्रस्य सम्पादनं, प्रकाशनं, तत्प्रचारणमेव तद्रचनाशिल्पगततन्त्रसूत्रानुरोधादतीव कठिनं, बहुव्ययसापेक्षं, नानासाधनोपकरणापेक्षि, बहुजनसहयोगात् कठोरश्रमसाध्यमिति सर्वादौ सम्प्रधार्यं भवति । दैनिकस्य पत्रस्य सम्पादने, प्रकाशने, सञ्चालने च विविधविषयाणां विशेषज्ञाः पृथक् पृथक् स्तम्भानां सम्पादकाः, समाचारसङ्ग्रहीतारः, पत्रप्रतिनिधयो, विशेषसम्वाददातारश्च नियोज्या भवन्ति । कर्मण्यत्र दैनिकपत्रसम्पादनरूपे प्रचुरद्रव्यविनियोगः । कर्तव्यः स्यादिति न विस्मरणीयम् । प्रधानसम्पादकस्तावदतीव सुयोग्यो विद्वान् कर्मठस्तत्तद्गुणगम्भीरो धीरो वीरश्चापि श्रमजीवो भवेद् यो हि स्वयं स्वकार्यकलापान् सुचारु सम्पादयन्नपि स्वसहयोगिभ्यो मार्गदर्शनं विदध्यात् । प्रधानसम्पादक कुलपतिरिव पत्रस्य सर्वासां प्रवृत्तीनां स्रष्टा, परिपोषको, रक्षकश्च भवति । ततः प्रधानसम्पादकेन दैनिकपत्रसम्पादने सहसम्पादका उपसम्पादकाः स्तम्भसम्पादकाश्च नूनं नियोक्तव्या भवन्ति । एवमेव पत्रस्य स्थायिनो लेखका, विशिष्टा लेखकाः कवयः,समालोचकाश्चित्रकारादयो न केवलं धनेनैव वरञ्च प्रीत्या, स्नेहेन, सम्मानेन, मार्गनिदर्शनेन, प्रोत्साहनेन, प्रेरणया सप्रश्रयं सविश्वासं च पोषणीया एव भवन्ति । एतत् सर्वमादौ विचार्य ततः 'स्वल्पारम्भाः क्षेमकराः' इतिवत्रीतिमादौ निर्धार्य ततः प्रवर्तितव्यम् ।

दैनिकपत्रस्य प्रकाशनविभागः, प्रबन्धसम्पादनविभागश्च पृथग् भवितुमर्हतः । यावत् स्वाधीनो मुद्रणालयो न भवेत्तावद्दैनिकपत्रस्य प्रकाशनं न निर्बाधं भवितुमर्हतीति सर्वेषामेव संस्कृतपत्रसम्पादकधुरीणानां भुक्तभोगानामनुभव । धनानुदानं स्वीकुर्वाणापि सैषा संस्कृतपत्रकारिता स्वावलम्बिनी भवेदिति लक्ष्यं स्यात् ।

दैनिकं वा मासिकं वा संस्कृतपत्रं तावत्पर्यन्तं चिराय स्वस्थं स्वजीवनक्रमे विकाशशीलं जनप्रियं च भवितुं न शक्नोति यावत् स्वाधीनो मुद्रणालयो, ग्राहकाणां भूयसी सङ्ख्या, सहयोगतत्परा लेखकाः, श्रमशीलाः सम्पादकस्य सहायका कार्यकर्तारो न स्युः । त एते सर्वे प्रचुरं पारिश्रमिकधनं दत्त्वा पोषणीया एव । एवं कृते संस्कृतस्य दैनिकं पत्रमेकं संस्कृतपत्रकारसङ्घस्य मुखपत्ररूपं प्रचलेत्तदैव सङ्घस्यास्तित्वं स्वोपयोगात् सफलं सिद्ध्येत् ।

अथ दैनिकपत्रतोऽतिरिक्तं साहित्यसेवाङ्के संस्कृतपत्रकारसङ्घेनैकं मासिकपत्रमपि सम्पाद्यं स्यात् । यद्यप्यधुना देशेऽत्रास्माकं कानिचित् संस्कृतभाषायाः पत्राणि मासिकानि त्रैमासिकानि च प्रकाश्यन्ते, तानि च स्व-स्व क्षेत्रे संस्कृतपत्रकारिताया विकासमेव साधयन्ति वर्तन्ते--इति शोभनम् किन्तु संस्कृतपत्रकारसङ्घद्वारा सम्पादितं प्रकाशितं च मासिकपत्रं किमप्यन्यादृशमत्युच्चस्तरीयं रमणीयं सदन्ताराष्ट्रियपत्रकारिताक्षेत्रेऽपि च स्वप्रभावोत्कर्षनिदर्शकं सचित्रं विचित्रं च भवितुमर्हति । तत् पत्रं मुख्यतः साहित्यिकी मासिकपत्रिका स्यात् । पत्रिकायां तस्यां दार्शनिकविषयाणां, साहित्यिकानां, समालोचनात्मकसन्दर्भानां, काव्यप्रविरचनानां, राजनीतिप्रधानानां, महिलोपयोगिसाहित्यस्य, बालोपयोगिसाहित्यस्य, ललितकलानां सर्वविधविज्ञानां नानाविषयाणाम्

स्तम्भाः स्युः । पत्रिकायामस्यां विविधवर्णानि चित्राणि कलात्मकानि भवितुमर्हन्ति । बहूद्देश्य, बहुजनप्रियं, विविधविषयविभूषित, सार्वभौम प्रचरिष्णु, निखिलभारतीयसंस्कृतसमाजस्य प्रतिनिधिस्वरूपमेतन्मासपत्रं तथा सम्पाद्यं भवति येन सर्ववर्गीयाः पाठकाः संस्कृतभाषाया. संस्कृतसाहित्यस्य च परिचयमधिकाधिकमाप्नुवाना मोदेरन् । एवं बहुजनभोग्यां मासिकीमुत्तमोत्तमां साहित्यिकीं मासिकपत्रिकां प्रकाश्य संस्कृतपत्रकारसङ्घः सुरभारत्याः सेवां प्रचारमभ्युदयं च साधयितुं सयत्न. स्यात्तदा संस्कृतपत्रकारिताया विकाशोऽभीष्टां ससिद्धिं लभेत ।

यथास्माभि प्रागेवोक्त यत् संस्कृतभाषाया पत्रकारिताविकाशः स्वावलम्बननिर्भरो भवितुमर्हतीति । तत् पुनरत्र स्मरणार्हं यद्धि पत्रकारिता नाम बहुधनसाध्या नानाभौतिक साधनान्यपेक्षते । तत प्रायो धनविनियोगसम्बन्धीन्युपादानान्तराण्यवश्यमेव चिन्तनीयानि भवन्ति । स एष पत्रकारिताया. शिल्पतन्त्रगतो भौतिकपक्ष. नोपेक्षणीयः । वस्तुतोऽत्रश्रेयान् पन्थास्त्वयमेवास्ते यत् संस्कृतपत्राणि लोकजीवने तथाऽऽवश्यकानि दैनिकजीवने जनानामङ्गीभूतानि भवितुमर्हन्ति, यथा तेषां पाठकसंख्या ग्राहकसंख्या च प्रभूता भूयसी स्यद्यया धनाप्तिर्व्ययश्च तद्योगक्षेममावहन्तौ समानौ स्याताम् । लाभांशोऽधिको भवितुमर्हति, येन पत्रकारसङ्घः स्थायिकोशं संस्थापयितुं प्रभवेत् । यदा संस्कृतपत्राणि महत्त्वपूर्णैस्तैस्तैर्बाह्याभ्यन्तरगुणैः सम्पन्नानि ग्राहकाणां मनोहराणि, चारूणि, समाकर्षकाणि च भवेयुस्तदैव तेषां सञ्चारो भूयान् साफल्यसो च ग्राहकसंख्या भवितुं सम्भाव्यते ।

सत्यमेव संस्कृतपत्रकारसङ्घः प्रारम्भिकयां स्थितौ पञ्चवर्षाणि यावद् भारतराष्ट्रेऽत्र वर्तमानेभ्यः संस्कृतप्रणयिभ्यो धनिकेभ्यो विश्वविद्यालयेभ्यः संस्कृतसंस्थाप्रतिष्ठानेभ्यः सभासम्मेलनादिसंस्कृतसङ्घटनेभ्यः सर्वप्रदेशीयसाहित्यिकीभ्य संस्थाभ्यो मोहान्तेभ्यो व्यापारिकसंस्थानां दानवीरेभ्य केन्द्रियशासनात् प्रान्तीयराज्यशासनेभ्यो वान्येभ्यः स्त्रोतोभ्यो धनसाहाय्यमावर्जयितुं प्रयतेत, तदप्यावश्यकम् । श्रेयस्करे कर्मणि कस्मादपि धनसाहाय्यादान नाम न दोषकर, परन्त्वत्रेदं सुविनिश्चयाज्ज्ञातव्य परपरमुखापेक्षिणां सङ्घटनाना वर्गप्रधानतया सक्रियेऽस्मिन् प्रजातन्त्रात्मके भौतिकसङ्घर्षयुगे प्रागिव लोकाना धर्मभावनयैव संस्कृतभाषाऽऽश्रयमाप्य स्वजीवन परिपालयेदिति न सम्भवति, न च तद्वाञ्छनीयमेव । विशेषत पत्रकारिताया क्षत्रं तु भिक्षावृत्ति. सर्वथा परिहार्या भवेत्पत्रकारं । परोपजीविनामन्येषा कृपया संरक्षितानाम् पत्राणां जीवन कियदिति प्रागेव दृष्टमस्माभिः । ततो यथा संस्कृतपत्रकारिता सेयं सर्वसमन्वयप्रधानापि च सर्वतन्त्रस्वतन्त्रा, विशेषतोऽर्थतन्त्रे स्वाधीना चिरञ्जीविनी भूयात्तथा प्रयतितव्यं भवति ।

एवं तदैव सम्पद्येत यदा संस्कृतपत्रकाराः पाठकानेवादौ साधनभूतान् मत्वा तान् प्रति सचेष्टा भवेयुः । सर्वसाधारणो भारतीयो वा, यो वा को वापि भारतीयनरो विश्वनागरिक संस्कृतस्य दैनिकमासिकपत्राणां गुणाकर्षणादेव तद्ग्राहकत्वं परिपालयन् मोमुद्येत, तदैव स्वस्थ विकाशमाश्रयेयुः संस्कृतपत्राणि ।

अथ पत्रकारसङ्घस्य भाषामाध्यमं तु संस्कृतभाषैव स्यादिति तु सर्वानुमोदितमिव स्वतः सिद्धमिवास्ते तथापि भाषानीति सुस्पष्टा भवितुमर्हति । विषयानुसारिणी संस्कृतभाषा सरला वा प्रौढा वा भवत्येव, लेखकानां व्यक्तित्वानुरूपा शैली चापि भवति एवं तथापि पत्रकारसङ्घस्य दैनिकपत्रस्य भाषा, शैली च हिन्दी-

समाचारपत्राणामिव सरलातिसरला व्यावहारिकी सर्वसाधारणस्य कृते सुबोधा तथ्यपूर्णा च भवेदिति परमावश्यकम् । दैनिकपत्रस्य संस्कृतभाषा तथाविधा स्वीकर्तव्या स्याद्यथा 'दैनिकहिन्दुस्तान' पत्रस्य स्तम्भेषु प्रयुक्ता हिन्दीभाषा संस्कृतव्याकरणस्य विभक्तिक्रियापदादिभि कारकचिह्नैः संस्कृत्य (अनुवाद्य वा) संस्कृती कृता स्यात् । इत्थंविधया बहुजनभोग्यया सर्वसामान्यैर्भारतीयैरन्यैर्वा साक्षरैर्व्यवहार्यया सरलसुबोधया संस्कृतभाषया दैनिकपत्राणां सञ्चारः प्रचारो, लोकहृदये प्रतिष्ठा ग्राहकेषु प्रीतिरुपयोगितोपादेयता च स्वाभाविकेन प्रकारेण मसिद्ध्येदेव ।

मासिकपत्रेषु तत्तत्स्तम्भानुरूपं विषयानुसारिणी दार्शनिकी, साहित्यिकी, शास्त्रार्थपरिष्कारप्रौढा, धार्मिकी वा सर्वविधा संस्कृतभाषा व्यवहरणीया भवेद्यथेष्टम् । तत्र पाण्डित्यप्रदर्शनस्य, कलकलालापानां, तर्ककर्कशानां विचाराणाम्, गम्भीरविषयविमर्शानां, शैलीचमत्काराणामलङ्कारविधानानां च भूयानवकाशो भवेद्येन भारतवर्षदेशोऽसौ स्वजगद्गुरुत्वस्य मञ्जुमुद्रां सर्वभाषाविदां हृदि समुट्टङ्कयितुं प्रभवेत् । मासपत्रेष्वपि बालमहिलोपयोगिषु स्तम्भेषु कोमलकान्तपदावली मधुरा ललितपदविन्यासानायाससुबोधा सरला सरसा च भव्या भद्रा भावुकजनमनोहरा च संस्कृतभाषा भवतु ।

सति सामर्थ्ये संस्कृतपत्रकारसङ्घेन केचनात्र विषये रुचिमादधानाः सम्पादका वा सम्पादनकलाशिक्षामाकांक्षमाणाः स्वकीया जनाः पत्रकारत्वस्य शिक्षापादनार्थं देशे क्वचिन्महति पत्रकार्यालये सम्प्रेष्य प्रशिक्षणीयाः । यतः पत्राणां प्रकाशनशिल्पगतं तन्त्रमतीव जटिलं भवति । तज्ज्ञानं प्रायोगिकीं सक्रियां प्रत्यक्षानुभवकौशलमुस्फीतां रचनात्मिकां शिक्षामपेक्षते नूनम् । साक्षात्कृतेनानुभवेन क्रियात्मकेन विना वर्षशतैरपि न कोऽपि बहुसूत्रग्रथितमेतत् पत्रप्रकाशनशिल्पतन्त्रं बोद्धुं सक्षमो भवति ।

क्रमशो विकाशमासादयन् संस्कृतपत्रकारसङ्घो भारतस्य सर्वाण्यपि संस्कृतपत्राणि स्वनीत्या प्रभावयेत् । न केवलं नीतिनिर्देशैः परामर्शदानैः प्रस्तावैर्वा स्वशक्त्या प्रादुर्भवन्ति संस्कृतपत्राणि प्रभावयितुं प्रभवेत् संस्कृतपत्रकारसङ्घोऽपि तु हितचिन्तनं प्रेयः श्रेयश्च संरक्षेद्धनजनसाहाय्यप्रदानैः । कृते किलैव पत्रकारसङ्घः सर्वसंस्कृतपत्राणां प्रातिनिध्यं कर्त्तुं समर्थः स्यात् ।

स एष संस्कृतपत्रकारसङ्घोऽन्यान्यभाषाणां पत्रकारैः पत्रकारसङ्घैः सम्पादकैर्वरिष्ठलेखकैः साहित्यसेविभिर्ग्रन्थकारैः कविभिश्च सम्पर्कः संसाधयेत् । अखिलभारतीयपत्रकारसङ्घः प्रादेशिकभाषाणां सङ्घेषु च स्वप्रतिनिधीन् सम्प्रेष्य स्वास्तित्वं सजीवं प्रमाणयेत्, स्वप्रतिपत्तिं, प्रतिष्ठामुपयोगं च विवर्धयेदेतदतीवावश्यकम् ।

पत्रकारसङ्घोऽसौ संस्कृतपत्रकाराणां कृते सन्दर्भग्रन्थान्, निर्देशपुस्तिकाः (Directories) संस्कृतपत्रकारसहिता, संस्कृतपत्रकारितायाः इतिहासग्रन्थान्, संस्कृतपत्रसम्पादकानां जीवनचरितानि, संस्कृतसंस्थानामितिहासग्रन्थांश्च लेखयेद्येर्भाविनां संस्कृतपत्रकाराणां मार्गदर्शनं प्रोत्साहनं च सम्भवेत् ।

एवं नानोपायैः सङ्घटनप्रधानैर्वयमिदानीमेव संस्कृतपत्रकारितायाः विकाशाय सामूहिकरूपेण सोत्साहं प्रबलं पुरुषार्थमाचरेम तदावश्यमेव साफल्यमुपलभेमहि । कस्याश्चापि भाषायाः साहित्यस्य सभ्यतायाः संस्कृतेश्च विकाशो दीर्घकालीनं प्रयत्नमपेक्षते । सौभाग्यादधुना संस्कृतभाषायाः पत्रकारिताक्षेत्रं कैश्चित्तपस्विभिः कर्मठैः सिद्धासनैः सिद्धलेखनीकैः सम्पादकाचार्यैः सुपरिष्कृतमस्मत्पुरतो विद्यमानमास्ते । तदस्माभिः समयानुरोधात् सङ्कुचद्भिरपि न प्रारम्भसूरैर्न च दीर्घसूत्रैः सद्भिरत्र शुभोदर्काणि बीजानि निक्षेप्तव्यानि रक्षणीयानि संवर्धनीयानि चैतावदिह मात्रं निवेद्य विरम्यते विस्तरादिति शम् ।

(गतमासाङ्कतोऽग्रे)

श्री चैतन्यनीतिशतकम्

लेखक "श्री चैतन्य"

धनिनामुपहारेण,
श्वानवृत्तिमुपागताः ।
लोलुपा शासका सर्वे,
वाञ्छन्ति धनिक नरम् ॥३००॥

राज्यशक्ति करे धृत्वा,
धनिको याति पात्रताम् ।
सर्वं राष्ट्रस्य कोषं तु,
धनिकैर्लुण्ठयते सदा ॥३०१॥

धनिकानां तु प्रासाद-,
मागतो राजपुरुषः ।
कर्त्तव्याच्च्यवते शीघ्रं,
रुप्यकेण प्रताडितः ॥३०२॥

कृषिकर्म च वाणिज्य-
मुद्योगः पशुपालनम् ।
दुग्ध फलं वनोद्योगं,
राज्याधीनं विधीयते ॥३०३॥

भूगर्भमणुशक्ति च,
यातायातस्य साधनम् ।
विद्युतं जलशक्तिश्च,
राज्याधीन विधीयते ॥३०४॥

सम्वादसाधन सर्वं,
युद्धोद्योगस्तथैव च ।
खनिज गृहनिर्माण,
राज्याधीनं विधीयते ॥३०५॥

साहित्यं चैव सगीत,
नृत्यं गायनवादनम् ।
अभिनय कला सर्वा,
स्वायत्तत्वे विधीयते ॥३०६॥

शिक्षापत्रकारित्व.
क्रीडाकौशलमेव च ।
सभासम्भाषणं चैव,
स्वायत्तत्वे विधीयते ॥३०७॥

यात्रापर्यटन चैव,
नवान्वेषणतापि च ।
धर्मं सामाजिकं कृत्यं,
स्वायत्तत्वे विधीयते ॥३०८॥

दर्शनं ज्ञानविज्ञानं,
मनोविज्ञानमेव च ।
चिकित्साचार्यशास्त्र च,
स्वायत्तत्वे विधीयते ॥३०९॥

चरित्रवर्धकं कर्म,
सदाचारप्रवर्तकम् ।
सद्गुणे योजकं कृत्यं,
स्वायत्तत्वे विधीयते ॥३१०॥

कृषिकार्याय राज्यं तु,
कृषिसेनां नियोजयेत् ।
अन्नोत्पादनं कुर्यात्,
प्रभूत कृषिसैनिकै ॥३११॥

सैनिको राष्ट्ररक्षार्थं,
प्राणोत्सर्गं चिकीर्षति ।
तथैव कृषिशूरोऽपि,
किमर्थं न करिष्यति ॥३१२॥

कृषिकार्ये रतो वीरः,
कर्मवीरो नरोत्तमः ।
पोषकश्चान्नदाता च,
राष्ट्रपूज्यो हि गण्यते ॥३१३॥

कृषका श्रमिकाश्चैव,
राष्ट्रस्य श्रमसैनिका ।
घोरे युद्धे रता नित्य-
मभावं घ्नन्ति घातकम् ॥३१४॥

कोटिश. श्रमिकाणां तु,
श्रमसेना गतक्लमा ।
पतति यत्र तत्रैव,
स्वभावो नश्यति स्वयम् ॥३१५॥

राष्ट्रसम्पोषिणी सेना,
श्रमसेना गुणोत्तमा ।
पूजनीया मता विज्ञै-
र्देशसेवार्थतत्परा ॥३१६॥

घोरशीते महाग्रीष्मे,
वर्षाकालेपि दृश्यते ।
दिवसे वाथ रात्रौ वा,
कर्मणि श्रमिको रतः ॥३१७॥

धन्योऽयं श्रमिकः शूरः,
कर्मयोगी जनार्दनः ।
पोषकः पालको नित्यं,
राष्ट्रस्याधारिका शिला ॥३१८॥

गृहसंरक्षिणीमेनां,
श्रमसेनां प्रयत्नतः ।
योजयेद्युक्त कार्येषु,
राज्य धर्माश्रित सदा ॥३१९॥

श्रमिकः पूज्यते यत्र,
कृषकोऽपि स्वभावतः ।
धनं सवर्धते नित्यं,
सुख सौभाग्यमेव हि ॥३२०॥

शोषणं कृषकाणां तु,
श्रमिकाणां च जायते ।
अभावो दृश्यते तत्र,
दुःखं दुर्भाग्यमेव च ॥३२१॥

पापिनं पीडयेन्नित्यं,
राज्यं सर्वत्र सर्वदा ।
येन केन प्रकारेण,
नाशयेत् पापमण्डलम् ॥३२२॥

युद्धशक्ति दृढां कुर्यात्,
सर्वदा सर्वसाधनैः ।
शस्त्रैरस्त्रैः सुसन्नद्धो,
नूतनैरायुधैरपि ॥३२३॥

सदोद्यमः किं न करोति भद्रम्

ले० श्री वैद्य रामस्वरूपशास्त्री, सम्पादकः, बालसंस्कृतम्, बम्बई ७७

उद्योगशीलस्य भवन्ति कामाः
उद्योगशीलस्य भवन्ति वार्थाः ।
उद्योगशीलं समुपैति सिद्धिः
उद्योगशीलो लभते प्रतिष्ठाम् ॥१॥

उद्योगशीलस्य नरस्य लोके
न दुर्लभं किञ्चिदसंभवं वा ।
क्रियाविधिज्ञस्य च तस्य नित्यं
यशांसि कार्याणि च यान्ति वृद्धिम् ॥२॥

तिलेषु तैलं भवतीति सर्वो
जानाति तच्चापि विना प्रयत्नैः ।
लभ्यं न तस्मान्मतिमान् सदैव
विहाय मान्द्यं कुरुते स्वकार्यम् ॥३॥

न पौरुषं यस्य नरस्य विद्यते
न तस्य साफल्यमुपैति पार्श्वम् ।
मनोरथास्तस्य भवन्ति मोघाः
सर्वाणि कार्याणि च यान्ति नाशम् ॥४॥

कीर्तिं प्रसूते विदधाति सौख्यं
तनोति मानं वितनोति सख्यम् ।
ददाति धैर्यं विदधाति सिद्धिं
सदोद्यमः किं न करोति भद्रम् ॥५॥

अग्निसंहिता

मूललेखक —श्रीअरविन्द , अनुवादक –जगन्नाथा वेदालङ्कार अरविन्दाश्रम (पाण्डिचेरी)

भूमिका

वेदविषयकपरम्परा१—

वेदो नाम पावना ज्ञानग्रन्थ , सुविशालसग्रहो ऽन्त स्फुरितकवितानाम्, कृतिश्च तत्त्वविदामृषीणाम् इत्यासीत् वेदविषयिकाऽऽदरभावना प्राचीन काल । तेऽमी ऋषय किमपि महत् सार्वभौम, शाश्वतमपौरुषेय च सत्य निज-प्रदीप्त-मन सु समाददु , प्रकाशयामासुश्च तत् मन्त्ररूपेण । न खलु ते निजमनसा तत् परिकल्पयाचक्रु । ये चैते मन्त्रा तेषामन्त करणे प्रादुर्भूतास्ते हि शक्तिमच्छन्दासि ईश्वरप्रेरितानि ईश्वराद्भूतानि च, न तु साधारणप्रेरणाप्रसूतानि सामान्य'द्गमसमुद्भूतानि वा । इमे ऋषयश्च 'कवय' इत्यभिधयाऽभ्यधीयन्त, कालान्तरेण अय 'कवि' शब्द 'कवयितृ' मात्रवाचकोऽभून्, पर तदानीमय 'सत्यस्य द्रष्टा' इत्यर्थमभ्यधत्त । स्वय वेदोऽपीमान्२ 'कवय सत्यश्रुत ' अर्थात् दिव्यसत्यस्य अन्त श्रोतार ऋषय ' इत्याह, वेदश्च श्रुति ' इति नाम्नाऽऽम्नायत, अनन्तर चैतत् 'श्रुति' पदम् 'ईश्वरप्रेरितो धर्मग्रन्थ ' इत्यर्थक समजनि । इयमेवाभीन् वेदविषयिणी धारणा उपनिषदृषीणामपि, स्वप्रतिपादितसत्याना प्रामाण्यकृते उपनिषदा वेदमेव साक्षित्वेन प्रस्तुवन्ति पुन पुन । गच्छति काले इमा उपनिषदोऽपि श्रुतित्वेन, ईश्वरीय-धर्म-ग्रन्थत्वेन, आदरास्पदत्वमासादयन्त, पवित्रशास्त्रेषु च समावेश्यन्त ।

वेदविषयकपरम्परेय ब्राह्मणग्रन्थेष्वपि दृढबद्धमता । वेदाना याज्ञिक (कर्मकाण्डीय) भाष्यकारै महाप्रयासेन सर्वविषयाणा गाथात्मकयज्ञक्रियापरकव्याख्याने कृतेऽपि, कृते चापि पण्डितै ज्ञानकाण्ड-कर्मकाण्ड-विभाजन, स्वीकृत चापि मन्त्रभागस्य कर्मकाण्डत्वे उपनिषदा च ज्ञानकाण्डत्वे परम्परैषा ररक्षात्मानम् अनवरतम् । ज्ञानकाण्डस्य कर्मकाण्डे ईदृश निमज्जन निन्दित नितरा निदारुणशब्दै गीतायामुपनिषदि चैवस्याम । यत्सत्यम् उभाभ्यामपि ताभ्या वेदो दिव्यज्ञानस्य ग्रन्थत्वेन आद्रियते । अपि च श्रुति (श्रुतिशब्देऽत्र वेदा उपनिषदश्च उभयेऽप्यन्तर्भूता) अध्यात्मज्ञानार्थ परमप्रमाणत्वेन निर्भ्रान्तिग्रन्थत्वेन चागण्यत ।

कि तर्हि वेदविषयकपरम्परेयमखिला केवल मिथ्याकथा कपोलकल्पना च, कि वा निराधारा मूर्खतापूर्णा च ? यद्वा, अप्येतत् तथ्य यत् वेदस्य परवर्तिमन्त्रेषु केषुचित् उच्चविचाराणा य क्षुद्रतरोऽशो दृश्यते तस्मादेवैषा कल्पना समुद्भूता ? अपि नाम्पनिषदा प्रणेतृभि वेदमन्त्रेषु कश्चिदीदृशोऽर्थ आरोपितो यस्तत्र अविद्यमानोऽपि तै स्वकल्पनया स्वैरव्याख्यया वा समुद्भावितस्तत्र ? आधुनिकयूरोपीयविद्वद्भि एतदेव तथ्य प्रस्थाप्यते साम्प्रतम्, प्रभावित च तैरद्यतन-भारतीयमनीषिणा मन. । इममेव दृष्टिकोण पुष्णाति तेषा कथनमिद यत् वेदस्य ऋषय न केवल द्रष्टार:, किन्तु गायका पुरोहिताश्चासन् यज्ञनिष्पादका , तेषा गीतानि च सार्वजनिकयज्ञेषु गानार्थ व्यरच्यन्त, तानि खलु निरन्तर प्रचलितक्रियाकलापमेव निर्दिशन्ति, अपि च यज्ञविधीना लक्ष्यभूतबाह्यपदार्थाना धन समृद्धिशत्रुविजयादीनामर्थे प्रार्थनापराण्येव प्रतिभान्ति । वेदस्य महान् भाष्यकार सायण ऋचा कर्मकाण्डीयमर्थमेवोपन्यस्यति अस्मत्पुरत , आवश्यकतानुसार म तत्र तत्र गाथात्मक किवा ऐतिहासिकमर्थमपि

उपशीर्षकाणीमानि अस्माभि , योजितानि न तु मूललेखकेनोपन्यस्तानि ।—अनुवादक ।

यथा ऋग्वेद ५।५७।८, ६।४६।६ । अनु० ।

विवृणोति, तदपि केवलं विचारणीयविकल्पतया। परं कस्यचिदुदात्ततरार्थस्य निरूपणं तट्टीकायां सुविरलमेव, कामं स तस्य क्षीणाभासमनुमन्यते कदाचित्, अथवा उपक्षिपति तं वैकल्पिकरूपेण हताश इव याज्ञिक-गाथात्मक-व्याख्योपलब्धौ। तथापि स आध्यात्मिकदृष्ट्या वेदानां परमं प्रामाण्यं न निराकरोति न वाऽऽचष्टे ऋक्षु उच्चतरसत्यं नान्तर्निहितमिति। एतत् अन्तिमकार्यं च (वेदानामाध्यात्मिकप्रामाण्यनिराकरणादिकम्) अस्मद्युगे करणीयतयाऽवशिष्टमासीत्, कृतं चैतत् पाश्चात्यविद्वद्भिः प्रचारितश्च स्वकीयसिद्धान्तः।

यूरोपीयविदुषां मतम्—

यूरोपीयविद्वद्भिः कर्मकाण्डीयपरम्परा तावत् सायणादुपात्ता, परमन्यविषयेषु ते तं सुदूरमपास्य शब्दानां स्वैरां व्युत्पत्तिपरकव्याख्यां वेदमन्त्राणामनुमानिकाऽर्थान् वा कर्तुं प्रावर्तन्त। एवं च तैर्वेदानां नवीनस्वरूपमेकमुपस्थापितं यत् प्रायेण उच्छृङ्खलकल्पनाप्रसूतं चासीत्। वेदेषु ते भारतस्य प्राचीनेतिहासं, समाजरचनां, संस्थां, प्रथां, रीतिनीती, तत्कालीनसभ्यतायाश्चित्रं चान्वेषयितुम् यतन्त। भाषाभेदमवलम्ब्य तैः एतन्मतमुद्भावितं यद् आर्यैः उत्तरदिशः आगत्य द्रविडं (दक्षिणात्यं) भारतमाक्रान्तम्।[1] किन्तु स्वयं भारतीयेषु अस्याः घटनायाः काऽपि स्मृतिः परम्परा वा न प्राप्यते, न तथा कस्मिंश्चिन्महाकाव्येऽभिजातसाहित्ये वा एतस्याः कश्चिदुल्लेखो लभ्यते लेशतोऽपि। एषां यूरोपीयविदुषां मतेन वैदिकधर्मो नाम केवलं प्राकृतिकदेवतानां पूजा, सौरगाथाभिरभिपूरिता यज्ञैः पवित्रिता च। अथ चायं याज्ञिक-प्रार्थनाविधिरेकः प्रतरामादिमभाव-विचार-क्रियाकलापैराकलितं नान्यत् किमपि। इमा बर्बरप्रार्थना एव च बहुकीर्तितः, प्रभापरिवेष्टितः देवत्रमापादितश्च वेदः।

देवतानां रूपपरिवर्तनं वेदश्च—

आदिकाले भौतिकविश्वस्य शक्तयः—सूर्याचन्द्रमसौ, द्यावापृथिव्यौ, वायु-वर्षा-वात्याप्रभृतयः, परिवर्तिताः, प्रकृतिव्यापाराणामधिष्ठातारोऽनेके देवाश्च—पूज्यन्ते स्म इति नास्त्यत्र संशयावकाशः। रोमयूनानदेशयोः भारतवर्षे च अन्यासु च पुरातनजातिषु प्राचीनपूजायाः सामान्यस्वरूपमिदमेवासीत्। परम् एषु सर्वेष्वपि देशेष्विमा देवता उच्चतरमाध्यात्मिकं वा व्यापारं कर्तुमारभन्त। पैलेस एथिनी (PALLAS ATHENE) आदौ सम्भवतः जियुस् (ZEUS) नामकस्य आकाशीयदेवस्य, 'द्यौ'–रिति नाम्ना वेदे कीर्तितस्य शीर्षात् ज्वालारूपेण उद्भवन्ती उषोदेवताऽऽसीत्। प्राचीने 'अभिजात' यूनानदेशे सा उच्चतरव्यापारविधात्री देवताऽजायत, रोमवासिभिश्चासौ स्वीयया ज्ञानविज्ञानयोरधिष्ठातृदेवतया 'मिनर्वा' नामिकया सह एकत्वमापादिता। एवमेव 'नदी' देवता सरस्वती भारते ज्ञान-विद्या-कला-कौशलानां देवी समजायत। सर्वा अपि यूनानीयदेवता एवंविधं परिवर्तनं प्रापु:—अपोलो (APOLLO) नाम्नी सूर्यदेवता कविताया भविष्यवाण्याश्च देवता संजाता। हिफस्टस् (HEPHEASTUS) नामकोऽग्निदेवो दिव्यशिल्पी श्रमस्य देवो विश्वकर्मा समवृत्त। किन्तु भारते इयं परिवर्तनप्रक्रिया मध्यमार्गमेव निरुद्धा। अत्र वैदिकदेवैः निजाध्यात्मिकव्यापाराः स्तावदेव विकास-

---

१ अनुमानतः यीशवीयाब्दात् पञ्चदशशतकेभ्यः पञ्चविंशतिशतकपूर्वम् आर्यजातिः उत्तरपश्चिमीयसीमान्तमार्गेण दलशः भारतं प्रविष्टा, अस्य देशस्यादिमनिवासिनः द्राविडान् कोलभीलादिजातीयांश्च पराजयतेति आधुनिकपाश्चात्यैतिहासिकाः पुरातत्त्वविदश्च प्राहुः।
—अनुवादकः

भावयन्, किन्तु स्वनाह्यस्वरूपमपि सुस्थिरतयाऽ ऽरक्षन्धारयंश्च उच्चतरोद्देश्यार्थं चैकस्यै नवीन-देवमालायै अवकाशमदु । पौराणिकदेवेभ्य प्राधान्य-प्रदानं तेषां कृतेऽपरिहार्यं जातम् । इमे पौराणिक-देवाः पूर्वतरदेवाना विकासादेव आविरभवन् किन्तु विस्तृततर–विश्वव्यापार-निर्वहणभारमधारयन् । ते खलु विष्णु., रुद्र , ब्रह्मा (यो वैदिकदेवात् बृहस्पते-र्ब्रह्मणस्पतेर्वा विकासं प्रापत्), शिव', लक्ष्मी दुर्गा च । तदेवं भारते देवतानां रूपपरिवर्तनं पूर्णत्व नाभजत् । पूर्ववर्तिदेवता पौराणिकदेव-मालायाः क्षुद्रदेवतात्वेन परिणता. । अस्य प्रमुख-कारणमासीद् ऋग्वेदस्य जीवत्प्रमाणम्, यतस्तस्मिन् (ऋग्वेदे) देवतानामाध्यात्मिका बाह्याश्चोभयेऽपि व्यापारा युगपद्दृश्यन्त, उभयेभ्यश्च प्रवलगौरवम-दीयत । रोमयूनानदेशयोर्देवताना प्रारम्भिकस्वरूप-सुरक्षक. कोऽपीदृश. (वेदसदृश.) प्राचीनः साहि-त्यिकाभिलेखो नासीत् ।

रहस्यवादिनः—

अस्य परिवर्तनस्य कारणम् आसा प्राचीन-जातीनां सांस्कृतिकविकास एवासीदिति स्पष्टमेव, यतो हि यथा यथा आसु जातिषु सभ्यताया विकासो-ऽभवत् तथा तथैषा उत्तरोत्तर मन प्रधाना अभवन्, भौतिकजीवने चासां रतिर्न्यूनतामगमत् । फलत. आर्मिकनिजधर्मे निजदेवेषु च ईदृशि सुचारुतर-सूक्ष्म-तमतत्त्वानि अन्वेषयितुमावश्यकताऽनुभूता यानि आसां समधिक-मानसत्व-भावितानां विचाराणा-मपीदा चावलम्बनानि स्यु., यानि चैतां वास्तवि-कामध्यात्मता कामपि दैवी मूर्ति वा एषा रुचि-विचाराणामालम्बनत्वेन प्रमाणत्वेन चोपलब्धु पार-येयु: । परन्तु अस्या अन्तर्मुखप्रवृत्तेर्निर्धारणस्य दृढमूलत्व-संपादनस्य च यश: श्री: भूयिष्ठतया रहस्यविद्भ्य एव देया, यतो हि आसु आदिसभ्य-तासु तेषा सुमहान् प्रभावो बभूव । यत्सत्यम्, प्राय: सर्वत्रैव कदाचित् 'रहस्य' युगमासीत् यस्मिन् गंभीरतरज्ञानसम्पन्ना आत्मज्ञानिनो नि-जान्यभ्याससाधनानि, अर्थपूर्णविधिविधानानि प्रतीकानि च प्रतिष्ठापयांचक्रु:, स्वकीयाऽऽदिमत-बाह्यधर्माणां परिधौ सीमारेखाया वा गुह्यविद्या-स्थापयामासु. । रहस्यविद्येयं विभिन्नदेशेषु विभिन्न-रूपाण्यधारयत् । यूनानदेशे 'ऑर्फिकं (ORPHIC) 'एलुसीनियन' (ELEUSINIAN) रहस्यानि आसन्, मिश्र-खाल्दिया (EGYPT AND CHALDEA) देशयो: पुरोहिता., तेषां गुह्यविद्या-यन्त्रमन्त्रादयश्च बभूवु., ईरानदेशे मागिनो (MAGI)ऽभवन्, भारते च ऋषय. । इमे रहस्यवादिनः आत्मज्ञानस्य महत्तर-विश्वज्ञानस्य च प्राप्तौ निमग्ना अतिष्ठन् । तेऽन्व विन्दन यत मानवे बाह्यान्नमयमनुष्यस्य स्थूलस्तरु-स्य पृष्ठत. एको गभीरतर आत्मा अन्त: सत्ता च वर्तते यस्य यस्या वाऽन्वेषण प्रवेदनं च (ज्ञानं च) मानवस्य सर्वोच्चकार्यम् । "आत्मान विद्धि" इत्ये-वासीत् तेषां महती शिक्षा, यथा भारते आत्म-ज्ञानोपलब्धिरात्मनो महत्यावश्यकता, मनुष्यस्य उच्चतम काम्यवस्तु वाऽभवत् । अपि च, विश्वस्य बाह्यरूपाण्य पृष्ठतोऽस्थित किमपि सत्व परमार्थ तत्व वा तैरज्ञायि । अस्य सत्यस्य गवेषणमनुसरण साक्षात्करणं च तेषा महत्वाभिकाङ्क्षाया विषयोऽभूत् । तैः प्रकृतेः शक्तयो रहस्यानि चान्वेषितानि यानि खलु भौतिकविश्वस्य रहस्यानि शक्तयश्च नासन् किन्तु यद्द्वारा भौतिक-जगति भौतिकवस्तुषु च गुह्यप्रभुत्वं प्राप्तुमप्रार्थत । अस्या गुह्यविद्याया गुह्यशक्तेश्च व्यवस्थितरूपनिर्माणमपि एषां रहस्य-विदामोजस्विकार्येष्वन्यतममासीत् । परम् एतत् सर्वं केवलं कृच्छ्रेण निष्प्रमादेन च प्रशिक्षणेन, नियन्त्रणेन, प्रकृतिश धनेन च सुरक्षिततया कर्तुम-शक्यत । नासीदिदं साधारणमनुष्यसाध्यम् । यदि मनुष्या. कठोरपरीक्षां कृच्छ्रप्रशिक्षण च विना एषु विषयेषु पदं निदधतु तर्हि तत् तेषामन्येषां च कृते

सकटपूर्णमेव स्यात्, यतोऽस्य ज्ञानस्य आसा शक्त नां च दुरुपयोग सभाव्यते, अशुद्धव्याख्या वस्तु शक्यत एतज्ज्ञानशक्त्यादिक सत्यादसत्य प्रति शुभादशुभ प्रति च परावर्तयितु पार्यते। अत एव सवमपि कठोरतया गुप्तमरक्ष्यत, प्रच्छन्नतयैव गुरुणा शिष्याय ज्ञानमदीयत। प्रतीकानामावरणमेक व्यरच्यत यस्य पृष्ठत इमे रहस्यमयविषया आश्रय ग्रहीतुमशकन् कानिचित सलाक्षसूत्राण्यपि प्रणीतान्यासन् यानि दीक्षितैरेव बोदधुमशक्यन्त, यानि चान्येषामविदितान्यभवन् यद्वा ईदृशे बाह्यार्थ एवागृह्यन्त यस्तेषा वास्तविकमर्थ रहस्य च सावधान तया समावृणोत्। अयमेवासीत् रहस्यवादस्य सार सर्वत्रापि।

वेदाना गुह्यार्थकत्वपरम्परा—

